# bhUtAdhipastotram

# भूताधिपस्तोत्रम्

## Document Information

Text title : bhUtAdhipastotram

File name : bhuutaadhipastotram.itx

Category : deities_misc, stotra

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : April 23, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 1, 2026

*sanskritdocuments.org*

# भूताधिपस्तोत्रम्

भूताधिपं भजे भूताधिपं - दिव्यभूताधिपं भजे भूताधिपम् ॥ १
देवारिमर्दनं भूताधिपं भू-तगणसुवन्दितं भूताधिपम् ॥ २
देवेन्द्रवन्दितं भूताधिपं - भक्त-वृन्दबहुस्तुतं भूताधिपम् ॥ ३
कारुण्य वीक्षणं भूताधिपं - श्री-गजमुखसोदरं भूताधिपम् ॥ ४
श्रीकुण्डलाञ्चितं भूताधिपं श्री-मणिकण्ठभासुरं भूताधिपम् ॥ ५
नाळीकलोचनं भूताधिपं श्री-कालाम्बुदश्याळं भूताधिपम् ॥ ६
नानार्थ दायकं भूताधिपं कलि-दोषदावानलं भूताधिपम् ॥ ७
दीनार्ति भञ्जनं भूताधिपं सु-भक्तजनतारकं भूताधिपम् ॥ ८
पाण्ड्येशसेवकं भूताधिपं पाण्ड्य-वंशसुरक्षितं भूताधिपम् ॥ ९
क्लेशपाशक्षतिं भूताधिपं क्लिष्ट-जनरक्षकं भूताधिपम् ॥ १०
संसारतारकं भूताधिपं शत्रु-कुलध्वंसकं भूताधिपम् ॥ ११
पुण्यलोकाश्रयं भूताधिपं पुण्य-जनपूजितं भूताधिपम् ॥ १२
आश्रितवत्सलं भूताधिपं विश्व-विश्रुतविग्रहं भूताधिपम् ॥ १३
कल्याणदायकं भूताधिपं सु-कीर्तन सक्त चित्तं भूताधिपम् ॥ १४
किरातवपुषं भूताधिपं मृग-यावनस्थितं भूताधिपम् ॥ १५
अज्ञाननाशनं भूताधिपं सु-विज्ञानदायकं भूताधिपम् ॥ १६
अद्भुतविग्रहं भूताधिपं अणि-मादिसिद्धिदं भूताधिपम् ॥ १७
समस्तैकनाथं भूताधिपं ताप-त्रयशान्तिदं भूताधिपम् ॥ १८
भूताधिप स्तोत्रं समाप्तम् ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

pdf was typeset on March 1, 2026

Please send corrections to *sanskrit@cheerful.com*